# वैयाकरणसिद्धान्तकौमुदी

## हलन्तनपुंसकलिङ्गप्रकरणम् (०४)

## ०४.०९.२०१२

# नकारान्ताः नपुंसकलिङ्गाः - पुनरावर्तनम्

- ब्रह्मन्
- अहन्
- दीर्घाहन्
- दण्डिन्
- स्रग्विन्
- वाग्ग्मिन्

- नकारान्तः नपुंसकलिङ्गः ‘बहुवृत्रहन्’शब्दः ।
- बहवः वृत्रहणः यस्मिन् तत्

- बहुवृत्रहन् स्
- बहुवृत्रहन् (‘स्वमोर्नपुंसकात्’ - ७.१.२३)
- बहुवृत्रह (‘नलोपः प्रातिपदिकान्तस्य’ - ८.२.७)

- बहुवृत्रहन् औ
- बहुवृत्रहन् (शी) ई (‘नपुंसकाच्च’ - ७.१.१९)
- बहुवृत्रह् न्  ई (‘विभाषा ङिश्योः’ - ६.४.१३६)
- बहुवृत्रघ् न् ई (‘हो हन्तेर्ञ्णिन्नेषु’ - ७.३.५४)
- बहुवृत्रघ्नी
- अल्लोपाभावपक्षे,
- बहुवृत्रहणी (‘एकाजुत्तरपदे णः’ - ८.४.१२)

- बहुवृत्रहन् (जस्) अस्
- बहुवृत्रहन् (शि) इ ('जश्शसोः शिः' - ७.१.२०)
- बहुवृत्रहान् इ ('इन्हन्पूषार्यम्णां शौ' - ६.४.१२)
- बहुवृत्रहाणि ('एकाजुत्तरपदे णः' - ८.४.१२)

- बहुपूष, बहुपूष्णी/बहुपूषणी, बहुपूषाणि ।
- बह्वर्यम, बह्वर्यम्णी/बह्वर्यमणी, बह्वर्यमाणि ।

# जकारान्ताः नपुंसकलिङ्गाः

- जकारान्तः नपुंसकलिङ्गः 'असृज्' शब्दः ।
- रक्तपर्यायः ।
- नञ्पूर्वकात् सृजधातोः क्विप्-प्रत्ययान्तः ।
- असृजः पदान्ते कुत्वम्, सृजेः क्विनो विधानात् ।
- 'व्रश्च..' (८.२.३४) इति षत्वे, जश्त्वे, 'क्विन्प्रत्ययस्य कुः' (८.२.६२) इति कुत्वम् ।
- विश्वसृड् इत्यादौ तु न ।
- 'सृजिदृशोः..' इति सूत्रे 'रज्जुसृड्भ्याम्' इति भाष्यप्रयोगात् ।
- अनव्ययपूर्वपदस्य सृजेः भाष्यप्रयोगतः कुत्वाभावः ।

- एवं सत्यपि, देवेट् इत्यादौ कुत्वं दुर्वारं स्यात् । अत आह -
- यद्वा, व्रश्चादिसूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः ।
- तथा च विश्वसृड् इत्यादौ देवेडादौ च षत्वं निर्बाधम् ।
- ननु एवं सति स्रग्-ऋत्विक्छब्दयोः अपि ‘क्विन्प्रत्ययस्य..’ इति कुत्वं बाधित्वा व्रश्चादिना षत्वं स्याद् इत्यत आह -
- स्रगृत्विक्छब्दयोस्तु निपातनादेव कुत्वम् ।
- ननु तर्हि असृक्छब्दे अपि कुत्वापवादः षत्वं स्यात्, इत्यत आह -
- असृक्छब्दस्तु अस्यतेः औणादिके ऋच्प्रत्यये बोध्यः ।
- असु क्षेपणे इत्यस्मात् ऋन् प्रत्ययः । ‘चोः कुः’ इति कुत्वम् ।

- असृक्/असृग्, असृजी, असृञ्जि ।
- जसि, जसः शौ, झलन्तत्वात् नुमि, अनुस्वारपरसवर्णौ ।
- शस्प्रभृतिषु 'पद्दन्नोमास्..' (६.१.६३) इति वा असन् ।
- असृञ्जि / असानि ।
- असृजा / अस्ना ।
- असृग्भ्याम् / असभ्याम् इत्यादि ।

- जकारान्तः नपुंसकलिङ्गः ऊर्ज् शब्दः ।
- ‘ऊर्ज बलप्राणनयोः’, क्विबन्तः ।
- ऊर्क्/ऊर्ग् ।
- ‘चोः कुः’ (८.२.३०) ।
- ऊर्जी ।
- ऊन्र्जि ।
- झलन्तत्वात् नुम्, स च अन्त्यादचः ऊकारस्य परत्वेन भवति ।
- नरजानां संयोगः ।

- बहूर्जि नुम्प्रतिषेधः, अन्त्यात्पूर्वो वा नुम्, बहूर्जि बहूञ्र्जि वा कुलानि ।
- 'बहूर्जि प्रतिषेधो वक्तव्यः, अन्त्यात् पूर्वं नुममेक इच्छन्ति' इति वार्त्तिकं प्रवृत्तम् । तदेतदर्थतः संगृह्णाति ।
- अत्र 'बहूर्जि प्रतिषेधः' इति प्रथमवार्तिकं न कर्तव्यम्, 'नपुंसकस्य झलचः' इति सूत्रस्य 'अचः परो यो झल् तदन्तस्य क्लीबस्य नुम् स्यात्' इति व्याख्याने सति नुमः एव अत्र अप्रसक्तेः ।
- न च एवं सति वनानि इत्यादौ अव्याप्तिः शङ्क्या, 'इकोऽचि विभक्तौ' इत्यतः अचि इति अनुवर्त्य अजन्तस्य क्लीबस्य सर्वनामस्थाने परे नुम् स्याद् इति वाक्यान्तराश्रयणाद् इति भाष्ये स्थितम् ।

# दकारान्ताः नपुंसकलिङ्गाः

- दकारान्तः नपुंसकलिङ्गः त्यद् शब्दः ।
- त्यद् / त्यत्
  - नपुंसकत्वात् सोः लुक् । प्रत्ययलक्षणाभावेन त्यदाद्यत्वं, सत्वं च न ।
- त्ये
  - त्यदाद्यत्वम्, औङः शी, गुणः ।
- त्यानि
  - त्यदाद्यत्वं, जसः शिः, नुम्, उपधादीर्घः ।
- तत्/तद्, ते, तानि ।
- यत्/यद्, ये, यानि ।

- एतत्/एतद्, एते, एतानि ।
- अन्वादेशे तु एनत् ।

- दकारान्तः नपुंसकलिङ्गः बेभिद् शब्दः ।
- बेभिद्यतेः क्विप् ।
- बेभिद्य - यङन्तम् ।
- बेभिद्य (क्विप्) व्
- बेभिद्य् व् ('अतो लोपः' - ६.४.४८)
- बेभिद् व् ('लोपो व्योर्वलि' - ६.१.६६)
- बेभिद् ('वेरपृक्तस्य' - ६.१.६७)
- बेभित्/बेभिद्, बेभिदी ।

- शावल्लोपस्य स्थानिवत्त्वाद् अझलन्तत्वात् न नुम् ।
- अजन्तलक्षणस्तु नुम् न, स्वविधौ स्थानिवत्त्वाभावात् ।
- बेभिदि ब्राह्मणकुलानि ।
- चेच्छिदि ।